# संस्कृत-वार्ता:

**दिनाङ्क :-26.06.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

-

**अद्य लोकसभा-अध्यक्षस्य निर्वाचनम्। प्राङ्गणे ओम् बिरला एनडीएतः तथा इण्डिया गठबंधनतः के सुरेशः ।**

अष्टादश्या: लोकसभायाः अध्यक्ष पदस्य निर्वाचनं अद्य भविष्यति। भाजपादलस्य वरिष्ठ: सांसद: ओम बिरला एतद्वारं अपि अस्मै पदाय एनडीए प्रत्याशी विद्यते। अपरपक्षे विपक्षतः इण्डिया गठबन्धनतः काङ्ग्रेससांसदः के. सुरेशः अस्ति।

संसदीयकार्याकारी मन्त्री किरेन् रिजिजुः उक्तवान् यत् लोकसभायाः अध्यक्षः सर्वसम्मत्या निर्विरोधेन निर्वाचितः भवेत्।

संसदात् बहिः केन्द्रीयमन्त्री पीयूषगोयलः अवदत् यत् केन्द्रीयस्य- वरिष्ठमन्त्रिणः राजनाथसिंहः, अमितशाहः, जे.पी.नड्डा लोकसभा अध्यक्षस्य चयनविषये सहमतिं निर्मातुं काङ्ग्रेसनेत्रा के.सी. वेणुगोपालेन एवं डीएमके सांसदेन टी.आर. बलुना च सह मिलितवन्तः।

काङ्ग्रेस-सांसद: राहुलगान्धी उक्तवान् यत् लोकसभा- अध्यक्षपदाय एनडीए-प्रत्याशिनं समर्थयितुम् विपक्षः सज्जः अस्ति। परन्तु उपाध्यक्ष- पदं विपक्षाय दातव्यम्।

अस्माकं वार्ताहरेण उक्तं यत् स्वातन्त्र्यकालात् एव लोकसभायाः अध्यक्षस्य निर्वाचनं कस्यापि स्पर्धायाः विना भवति, परन्तु एतत् प्रथमवारं अस्ति अस्य पदस्य निर्वाचनं भवति।

संविधानस्य अनुच्छेद-त्रिनवति-अनुसारं लोकसभायाः अध्यक्षः सामान्येन बहुमतेन निर्वाचितः भवति ।

**लोकसभायां नवनिर्वाचितानां सांसदानां शपथग्रहणप्रक्रिया सम्पन्ना**

अष्टादश- लोकसभायां नवनिर्वाचितानाम् सांसदानां शपथग्रहणस्य प्रक्रिया सम्पन्ना। राष्ट्रपति द्रौपदी मुर्मू: गुरुवासरे लोकसभाया: राज्यसभायाः च संयुक्तसभां सम्बोधयिष्यति।

**अष्टादशम- लोकसभायां चतु:सप्तति: महिलानां निर्वाचनं कृतम्, या: विधि -निर्माणे महत्त्वपूर्णं योगदानं दास्यन्ति।**

अष्टादशी-लोकसभा न केवलं देशस्य विविधतायाः प्रतिनिधित्वस्य कृते अपितु महिलानां महत्त्वपूर्णायै उपस्थितये अपि उल्लेखनीया अस्ति । विविधेभ्यः व्यवसायेभ्यः, क्षेत्रेभ्यः, पृष्ठभूमिभ्यः च चतु:सप्तति: महिलाप्रतिनिधिभिः सह अष्टादशी-लोकसभा लोकतान्त्रिकस्य समावेशीराष्ट्रस्य च भावनायाः प्रतिबिम्बरूपा अस्ति।

**दिल्ली उच्चन्यायालयेन धनशोधनप्रकरणे दिल्लीमुख्यमन्त्रिणः अरविन्द केजरीवलस्य निग्रह- विमोचन- प्रतिभूति-याचिकाप्रदानाय न्यायालयस्य आदेशः स्थगितः**

दिल्ली उच्चन्यायालयेन धनशोधनप्रकरणे दिल्लीमुख्यमन्त्रिणः अरविन्दकेजरीवालस्य निग्रह- विमोचन- प्रतिभूति-याचिकाप्रदानस्य कृते निम्न - न्यायालयस्य आदेशः स्थगितः। दिल्ली आबकारीनीतिसम्बद्धे भ्रष्टाचारप्रकरणे अरविन्द केजरीवालः मार्चमासस्य एकविंशति दिनाङ्के निगृहीतः आसीत्।

**उत्तरप्रदेशस्य मन्त्रिमण्डलेन परीक्षा- पत्राणाम् स्रवणम् निवारयितुं अध्यादेशस्य अनुमोदनं कृतम् यस्मिन् आजीवनकारावासः, एककोटिरूप्यकाणां दण्डैः च सह कठोरदण्डः प्रदत्तः**

उत्तरप्रदेशसर्वकारेण सार्वजनिकपरीक्षासु अनुचितसाधनेन परीक्षा- पत्र - प्रसारणं निवारयितुं अध्यादेशम् आनेतुं निर्णयः कृतः। मुख्यमन्त्रिणः योगी आदित्यनाथस्य अध्यक्षतायाम् अद्य राज्यमन्त्रिमण्डलस्य उपवेशने उत्तरप्रदेशस्य लोकपरीक्षा (अनुचितसाधननिवारण) अध्यादेश चतुश्चत्वारिंशदुत्तर-द्विसहस्र आनेतुं प्रस्तावः अनुमोदितः। मन्त्रिमण्डलस्य सत्रे अन्ये द्विचत्वारिंशत् प्रस्तावाः अपि अनुमोदिताः।

**NEET-2024**

NEET-2024 राष्ट्रीय पात्रता सह प्रवेश परीक्षाभ्रष्टाचार-प्रकरणे एकः आरोपी महाराष्ट्रस्य लातुरारक्षिभिः निगृहीतः। अभियुक्तस्य नाम संजय जाधवः अस्ति। इलाहाबादस्य जीबी पन्त विज्ञान संस्थानस्य आचार्येण बद्रीनारायण तिवारिणा उक्तं यत् नीट-यूजी इति परीक्षायां अनियमिततायाः विषये शिक्षामन्त्रालयः पूर्णगम्भीरतया कठोरतया च क्रियान्वयनम् करोति। तेन आशा प्रकटिता यत् नीट्-यूजी परीक्षायां अनियमितानां अन्वेषणार्थं गठितायाः उच्चस्तरीयसमित्याः प्रतिवेदनं अपेक्षानुरूपं भविष्यति।

**ऋतुविभागेन**

ऋतुविभागेन आगामिषु पञ्चदिनेषु पश्चिमतटे पूर्वोत्तरभारते च प्रचण्डवृष्टिः भविष्यति इति संभावना प्रकटिता।

ऋतुविभागेन आगामिषु चतुःपञ्चदिनेषु पश्चिमतटे पूर्वोत्तरभारते च प्रचण्डवृष्टेः सम्भावना प्रकटिता। आगामिषु त्रिचतुर्दिनेषु भारतस्य उत्तर-पश्चिम-मध्य-पूर्व-वायव्य- भागेषु दक्षिणपश्चिम-वर्षर्तोः कृते परिस्थितयः अनुकूलाः सन्ति। राष्ट्रीयराजधानीयां आगामिषु पञ्चषड्दिनेषु लघुवृष्टेः, मध्यम वायुप्रवाहस्य च सम्भावना वर्तते। ऋतुविभागेन अद्य अपि पञ्जाब-हरियाणा-पश्चिम-उत्तर-प्रदेश-बिहार-पश्चिमराजस्थान- राज्यानां केषुचित् भागेषु घर्म स्थितिः स्थास्यति इति संभावना प्रदर्शिता।

**।।इति वार्ता:।।**